No. १२८०

Title नत्र् वादः

Author मथुरानाथ भट्टाचार्यः

Extent ३ Age १८१२

Subject न्यायवैशेषिकम्.

नञ्वादः

१२८०

नञ्वाद

६६

॥ श्रीगणेशाय नमः ॥ श्रीगुरुगणपतिवटुकशारदाम्भ्यो नमः ॥ श्रीमंगलमूर्त्तये नमः ॥ श्रीसरस्वत्यै नमः ॥ श्री
विश्वेश्व० ॥ ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते ॥ अखंडानंदबोधाय पूर्णाय परमात्मने १ संसर्गाभावोऽन्योन्या
भावश्च नञोऽर्थः ॥ तत्रान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबलल्लभ्यं ॥ नीलघटवति न घ
टो नीलो घटो न घट इत्याद्यव्यवहारात् ॥ इदं पीतघटवति न नीलो घटः पीतघटो न नीलघट इत्यादिव्यवहारा
च्च ॥ प्रतियोग्यभावान्वयिनोस्तुल्ययोगक्षेमो ॥ तेनोपपत्त्योपस्थितस्य प्रतियोगिनोऽनुयोगिन्याधाराधेयभावसं
बंधेनैवान्वयबोधः तत्र नत्रसंसर्गाभावस्यापि तथैव० यथा पचति चैत्रो न पचति चैत्रश्चैत्रस्पंदने हं मैत्रस्यातिनि
उ० पर्यक्तत्वादेः प्रथमान्तोपस्थाप्यत एव तत्र तथैति तदभावस्यापि तथा ॥ षष्ठ्यादेश्चैत्रादिनिरूपितत्वलाद्विकं
अर्थानन्तु तन्निष्ठस्वामित्वमित्यादिस्यादि ॥ अतिप्रसंगात् ॥ तस्य धनाद्यवृत्तित्वेन चैत्रीयेऽपि धनेनेदं चैत्रस्येति
प्रतीतिप्रसंगात् ॥ निरूपकत्वादेः संबंधस्य प्रतियोगितानवच्छेदकत्वादित्येषा दिक् यत्र चाधाराधेयभावेन संब
धमर्याद्यासंभवः तत्रानुयोगिपदे सप्तम्यपेक्षा ॥ यथा चैत्रे पाककृतिः चैत्रेण पाककृतिः ॥ भूतले घटः भूत श्री
लेन घट इत्यादि स्मात्रच तात्पर्यवशात्कदाचिद्भूतलादौ घटाद्यभावः कदाचिच्च घटादौ भूतलादिवृत्तित्वाभा २

वृंस्य प्रतीयेते ॥ अत एव पृथिव्यां गन्धो न जले इत्यादौ प्रतीतेरेकविशेष्यकत्वानुभवः ॥ सप्तम्यर्थान्वयिनोऽभावस्य विशे
षणतया प्रतीतियोग्यान्वयः ॥ इति केचित् ॥ सर्वत्र विशेष्ये विशेषणस्याभावो नञा प्रत्याय्यते अत एव भूतले घटो ना
स्ति ॥ घटेन सन्तः घटा न सन्तीत्यादौ घटोऽस्तीत्यादौ निवृत्ते वचनैक्यनियम इत्याहुः ॥ तेषां जातौ न सत्तेऽसत्त्वगतिः प्रि
तेनीया ॥ जातिसमवेतत्वस्याप्रसिद्धत्वात् ॥ संबंधांतरेण जातिवृत्तित्वस्य च सत्तायां सत्वात् ॥ यत्र विशेषण
विशेष्ययोरभेदान्वयोऽस्तु तत्र सत्रान्योन्याभावो नञा प्रत्याय्यते ॥ यथा अयं घटो नीलो नायं घटो नील इति ॥ त
त्र विशेषणविशेष्ययोः समानविभक्तिकत्वं ॥ विरुद्धविभक्तिविरहेऽपाततः ॥ अत एव यजतिषु येयजामहं करोति ना
नुयाजेष्वित्यादौ एकवाक्यतानुरोधात् येयजामह इत्यस्यानुषंगो गौरवात् ॥ यजतिष्वनुयाजभेदो बोध्य
ते विशेषणविभक्तिः प्रयोगसाधुत्वार्थे नामार्थयोर्भेदान्वय एव प्रकारीभूतविभक्त्यर्थोपस्थितेस्तंत्रत्वात् ॥
ता घटेन न तु योरत्वे बोधमात्र एव तत्स्यात् विशेषणविभक्तिस्त्वभेदार्थिकाः नीलोत्पलइत्यादौ लुप्ता या विभक्ति
स्तु संधानाभेति मते ब्राह्मणराजा इत्यत्र षष्ठ्यर्थस्य संबंधस्यैवात्रापि प्रत्ययमुख्यस्य भेदस्याभावो बोध्यते ॥ एतत्क
रणनिषेधे विकल्पापत्तेर्भेदपरता ॥ तदसत् ॥ विशेषनिषेधे सामान्यविधेर्हि जरपजेऽयाग्रा हवणेऽग्नये हि

न·वा·मू: दातव्यंकौशिड्ग्मायननदानमभिसारोनुत्पत्तिसिद्धत्वेनविकल्पानवकाशात्।। नचनत्रापिकौशिड्ग्मभेदोवाध्यः।। कौशिड्
२ ग्मपदस्यविहितैकवचनविरुद्धत्वात् नखलुमहतोराज्ञोनमहतोराज्ञइत्येववमहतांसङ्गमनमहतांराज्ञाइत्यत्रापिम
हद्भेदभेदोप्रतीयेयातां एकोनहाविंशतिवत्कथञ्चित्समर्थनेपिद्वितीयस्यदातव्यमित्यस्यानन्वयप्रसंगात्।। अतएवरा
त्रौश्राद्धंनकुर्वीतेत्यस्योकरणनिषेधेपिनविकल्पावकाशः नहितत्रापिरात्रीतरपरतारात्रिभिन्नश्राद्धविधावपिअमा
वास्यायांपितृभ्योदद्यादित्यनेनारात्रौश्राद्धप्रसक्तेरुद्देशत्वात् नखलुक्रियारहितंश्राद्धविधायकंवाक्यान्तरमस्ति।।य
नेदंतेनसममेकवाक्यतामस्यामापादयेत्।। नापिदैनानुयाजेष्विति वत्पर्युदासक्रियारहितं।। अथरात्रौश्राद्धप्रसक्तौ
विकल्पापत्तिः प्रसक्तौनिषेधानुपपत्तिः।। प्रसक्तंहिप्रतिषिध्यतइतिचेत्साधीयानयंमन्त्रपाठोपद्धलाज्जलहृदेवहिनी
स्तीत्यादिवाक्येवाधेपिपरमप्रयत्नेननतत्त्वंहितुयादीयते।। तर्हिनिषेधविधिवैयर्थ्यमितिचेत् नात्पर्यानवबोधनिवं
धनरात्रिश्राकरणवारणस्यतदर्थत्वात् एकविषयतयापुनरत्रन्यगतिकत्व- षोडशिग्रहणाग्रहणवद्विकल्प
इति अत्रचषोडशिग्रहणंनेष्टसाधनमित्यादिकंनार्थः।। ग्रहणविधिविरोधात् अपितुषोडशिग्रहणाभा श्री
वइष्टसाधनं।। इत्यादिकंतुतत्त्वप्रानतसमभिव्याहृतधात्वर्थस्याभावविमन्त्र्यर्थान्वय अतएवश्राभाकरानकाल २

न॰वा॰म॰ जंमक्ष्ययेदित्तिप्रयुक्तत्वंजन्मलक्षणाभावविषयकंकार्यमित्यर्थमाहुः॥नियमस्तुतात्पर्यवशात्‌।मुख्यफलाजनकत्वेपिचां
२ गस्यपरमापूर्वस्यैवेष्टसाधनत्वमविरुद्धं ग्रहणविध्यन्यथानुपपत्त्याचषोडशिग्रहणादितिद्वारेणपरमापूर्वं॥तस्मा
3 त्वाविशेषेपितन्मुख्यफलमितिकल्पनतइतिसर्वमनवद्यं प्रतियोग्यभावयोः प्रतियोग्यनुयोगिभावोऽभावाधिकर
णयोश्चाधाराधेयभावः संबंधविधयाभासते निपातातिरिक्तस्थलएवप्रातिपदिकार्थयोर्भेदेनान्वयप्रकारीभूत
विभक्त्यर्थोपस्थितेरुक्तत्वात्‌॥अतएवेवाद्यन्वयबोधेनयथाद्यपेक्ष॥यथाचंद्रइवमुखम्‌।अत्राघटभूतलंत्र्यस
मेहाद्याइत्यादौसमासेसामानाधिकरण्यानुरोधान्नञर्थाभाववत्परता केचित्तु प्रतियोगिपदोत्तरषष्ठ्यास्वरूपः प्रति
योगित्वेऽनुयोगित्ववानर्थःउत्तरपदस्यचाधिकरणत्वेनत्वेवाऽभाववतिलक्षणाविभक्त्यर्थानुयोगिसमानवि
भक्तिकार्यपोरन्योन्याभावसंसर्गाभावबोधनेनन्ञानसामर्थ्यमन्तेननपचतिनञइत्यादौनन्योन्याभावोभू
तलंनघटइत्यादौघटादेः संसर्गाभावोनप्रतीयतइत्याहुरिति॥ ॥इतिनञ्वादः समाप्तः॥॥श्री॥ ॥संव
त्‌१८१२मीतिजेवदी ४ श्रावणेमासिसितेपक्षेत्रयोदश्यांतिथौशुक्रेत्र्यंबकयाज्ञिकदेवात्मजेनबाल श्री
कृष्णेनलिखितः॥स्वात्मपठनार्थंपरार्थंच॥काशीपाभैरवसमीपेच॥ ॥श्री ० ० ० ०० न॰ ३

न्याय